[1] Between 'tha' and 'vā' E writes the phrase, 'khaṃḍāṃtaraṃ 0 asya varga' but deletes it by putting two or three short backslashes above each letter. [2] तः E ] त J, तं U. [3] तो E ] त JU. [4] क्तो JE ] क्ता U. [5] घ···वृत्तं J('tra' for 'traṃ')U ] ∅ E. [6] नोत्थं JE ] नोत्थ U. [7] लोलवि JU ] विमल E. [8] ए···र्थं JU(with double *daṇḍa* after 'rthaṃ') ] ∅ E. [9] ६४ । JU ] ∅ E. [10] ४ । JU ] ∅ E. [11] स E ] ∅ JU; करण JU ] ∅ E; वृत्तं JU ] ∅ E. [12] अत्रो JU ] उ E. [13] वो JE ] वों U; न्स JE ] त्स U. [14] ष्टा UE ] ष्टां J. [15]

| | | |
|---|---|---|
| १ | १ | १ |
| ८ | ५ | २ |

JE ]

| | | |
|---|---|---|
| १ | १ | १ |
| ८ | ५ | २ |

| | |
|---|---|
| १ | १ |
| १८ | ४ |

U.

जातम् $\boxed{\frac{३३}{४०}}$ ॥ ३४.१॥

द्वितीयोदाहरणे न्यासः $\boxed{\frac{१}{१८}\ \frac{१}{४}}$[1] जातौ समच्छेदौ द्वाभ्यामपवर्तितौ[2] $\boxed{\frac{२}{३६}\ \frac{९}{३६}}$ अन्तरे जातम् $\boxed{\frac{७}{३६}}$[3] इति भागजातिः॥ ३४.२॥

अथ प्रभागजातौ करणसूत्रं वृत्तम्॥ ३५.०॥[4]

लवा लवाभिगुणिता हारा हाराभिसंगुणाः।[5]
भागप्रभागकेष्वेतत्सवर्णनमिति स्मृतम्॥ ३५॥[6]

अत्रोद्देशकः॥ ३६.०॥[7]

लक्षार्धस्य चतुर्लवोऽस्य चरणस्तस्यापि पञ्चांशक-
स्तत्त्वांशोऽस्य महीभृता गुणवता सत्पण्डितायार्पितः।
बाले कोमलवाग्विलासकुशले भागप्रभागाभिधां
जा$^{\forall}$तिं वेत्सि यदा तदा वद मितिं तद्रत्नदानस्य माम्॥ ३६॥ J9b

न्यासः। $\boxed{\frac{१}{२}\ \frac{१}{४}\ \frac{१}{४}\ \frac{१}{५}\ \frac{१}{२५}}$[8] सवर्णिते जातम् $\boxed{\frac{१}{४०००}}$[9] एवं दत्तानि रत्नानि २५॥ इति प्रभागजातिः॥ ३६.१॥[10]

भागानुबन्धभागापवा$^{\forall}$हयोः करणसूत्रं वृत्तद्वयम्॥ ३७.०॥[11] E5a

हरघ्नेषु रूपेषु भागा धनर्णं विधेया यदैकस्य चेत्तेऽधिकोनाः।
निजांशेऽधिकोने तलस्थच्छि$^{\forall}$दैवं हतो मुख्यहारोंऽशयुक्तोनितेन॥ ३७॥[12] U5a
तेन मुख्यलवो गुण्यस्तं विहाय पुनस्तथा।[13]
सवर्णनमिति प्रोक्तमनुबन्धेऽपवाहने॥ ३८॥

अत्रोद्देशकः॥ ३९.०॥

द्वयं सार्धं त्रयं व्यर्धं कियद्वद सवर्णितम्।[14]
असि चेत्कुशला बालेंऽशानुबन्धापवाहयोः॥ ३९॥

---

[16] J9a begins with the third column of this table. [1] $\boxed{\frac{१}{१८}\ \frac{१}{४}}$ JE ] ∅ U. [2] दौ JE ] दो U. [3] $\boxed{\frac{७}{३६}}$ JU ] $\boxed{\frac{७}{६}}$ E. [4] भाग UE ] भा J(with ‘ga’ in margin). [5] गु E ] गुं JU; राहा JU ] ∅ E. [6] भागप्रभागकेष्वेत ] भागप्रभागकेयेत J, स्तस्यापिपंचांशकस्तत्वांशोस्यमहीभृतागुणवताभागप्रभागेकेयेंत U(‘stasyā...vatā’ crossed out by means of a single horizontal line; ‘ge’ corrected to ‘ga’), प्रभागभाग(जातौकरणसूत्रंवृत्तं)केष्वेत E(‘jā...ttaṃ’ in parentheses); त्स JU ] त्सं E. [7] अत्रो J ] उ E. [8] E puts this table at the beginning of the next line between ‘rṇi’ and ‘te’ of ‘savarṇite’. [9] $\boxed{\frac{१}{४०००}}$ JE ] $\boxed{\frac{१}{४०००}}$ U. [10] प्र JE ] वि U. [11] भागानु···ह E(‘hā’ for ‘ha’) ] भागानुबंधपवाहन J, अथभानुबंधपवाहन U. [12] को UE ] के J. [13] गुण्यस्तं UE ] $^{\vee}$स्तं J(with ‘guṇya’ in margin; the wedge mark ‘∨’ indicates the place for its insertion); पुन JE ] पुर U. [14] सार्द्धं J(*anusvāra* crossed out)U ] सार्ध E.

J10a ∀न्यासः।

| | |
|---|---|
| २<br>१<br>२ | ३<br>°१<br>२ |

[1] सवर्णिते जातम्

| | |
|---|---|
| ५<br>२ | ५<br>२ |

॥ ३९.१॥

उदा° ॥ ४०.०॥[2]

अर्धं स्वत्र्यंशयुक्तं निजदलसहितं स्यात्कियत्त्र्यंशयुग्मं
स्वाष्टांशद्वन्द्वहीनं विरहितमथ तत्स्वत्रिभागेन कीदृक्।[3]
पादः पादेन हीनो निजगुणलवयुक्कीदृशोऽसौ ममैवं
बाले बालेन्दुवक्त्रे गणितकुसुमसत्स्रग्धरे त्वं वदाशु॥ ४०॥[4]

न्यासः

| | | |
|---|---|---|
| १<br>२<br>१<br>३<br>१<br>२ | २<br>३<br>°२<br>८<br>°१<br>३ | १<br>४<br>°१<br>४<br>१<br>३ |

[5] क्रमेण सवर्णिताः

| | | |
|---|---|---|
| १२<br>१२ | २४<br>७२ | १२<br>४८ |

द्वादशभिरपवर्तिता जाताः[6]

| | | |
|---|---|---|
| १<br>१ | १<br>३ | १<br>४ |

इति जातिचतुष्टयम्॥ ४०.१॥

J10b भिन्नसंकलितव्यव∀कलितयोः करणसूत्रं वृत्तम्॥ ४१.०॥[7]

योगो वा विवरं कार्यं राशीनां सदृशच्छिदाम्।[8]
कल्पनीयो विहारस्य राशे रूपमितो हरः॥ ४१॥[9]

अत्रोद्देशकः॥ ४२.०॥

चतुर्लवः पञ्चलवोऽर्धमेतानेकीविधायामलधीः प्रचक्ष्व।
तदीययोगेन विवर्जितानां किं स्याच्चतुर्णामवशेषकं च॥ ४२॥[10]

E5b न्या∀सः

| | | |
|---|---|---|
| १<br>४ | १<br>५ | १<br>२ |

एकीकृता द्वाभ्यामपवर्तिता जाताः[11]

| |
|---|
| १९<br>२० |

एभिर्वर्जिताश्चत्वारो जाताः[12]

| |
|---|
| ६१<br>२० |

इति संकलितव्यवकलिते॥ ४२.१॥

अथ भिन्नगुणनभिन्नभजनभिन्नवर्गादौ करणसूत्रं वृत्तद्वयम्॥ ४३.०॥[13]

J11a, U5b लवहतिर्हरघात∀विभाजिता भव∀ति भिन्नविघातविधौ फलम्।[14]

---

1 °E ] ∅ JU. 2 उदा° E ] ∅ JU. 3 यत्त्र्यं E ] लत्र्यं JU; नं विर JE ] नवि। र U. 4 सत्स्रग्ध JU ] स्रग्धं E; वदा JE ] तदा U. 5 All °'s E ] ∅ JU. 6 क्र···जाताः J('rṇitā' for 'rṇitāḥ') ]

| | | |
|---|---|---|
| १२<br>१२ | २४<br>७२ | १२<br>४८ ६ |

क्रमेणसवर्णिताजाताः∨ U('6' on the right shoulder of the table and the wedge mark '∨' after 'jātāḥ' indicate respectively the line and the exact place for the table), सवर्णिताजाताः E. 7 सं JE ] स U; व्यवक JU ] व्यव (र्णिताजाता) क E('rṇitājātā' in parentheses with short backslashes above each letter).
8 नां JU ] नं E; स···दाम् ] सदृशच्छिदं J, शदृशच्छिदां U, सदृशाच्छिदाम् E. 9 नी UE ] नि J; वि JE ] व्यि U; रा JE ] रो U. 10 मव E ] मिव J, मवद U. 11 की JU ] का E; द्वा···जा E ] जाताद्वापवर्त्ति J, द्वाभ्यांमपवर्त्ति U. 12 र्व JU ] व E; ताः JU ] ता E. 13 णन E ] णनं JU; र्गा UE ] र्गावर्गा J; रण JE ] र्ण U. 14 विघात E ] गुणेन JU.

लवहरौ परिवर्त्य ततश्छिदो गुणनवच्च फलं भजने स्मृतम्॥ ४३॥
हरांशयोः कृती वर्गे क्रियमाणे घने घनौ।[1]
अथ मूलस्य सिद्ध्यर्थं तन्मूले परिसाधयेत्॥ ४४॥[2]

अत्रोद्देशकः॥ ४५.०॥

अर्धं चतुर्थांशहतं भवेत्किं चतुर्थभागोऽष्टलवेन भक्तः।[3]
एवं त्रयाणां त्रिलवान्वितानां वर्गं घनं ब्रूहि ततोऽपि मूलम्॥ ४५॥

न्यासः [१/२ | १/४] गुणिते जातम् [१/८] अथ भजने न्यासः[4] [१/४ | १/८] भजने जातम् [८/४] अथ भिन्नवर्गादौ न्यासः [३/१ | १/३] एवं त्रयाणां त्रिलवान्वितं [३ १ ३] जातम्[5] [१०/३] अस्य जातो वर्गः[6] [१००/९] ∀अतो लब्धं मूलम् [१०/३] अथास्य जातो घनः[7] [१०००/२७] अतो लब्धं मूलम्[8] J11b
[१०/३]॥ ४५.१॥

इति भिन्नपरिकर्माष्टकम्॥ ४५.२॥

## ⟨ २.३ शून्यपरिकर्माष्टकम् ⟩[9]

अथ शून्यपरिकर्माष्टके सूत्रं वृत्तम्॥ ४६.०॥[10]

राशिः शून्ययुतोनितोऽप्यविकृतः शून्याहतः खं भवे
च्छून्याप्तः खहरोऽप्यसावविकृतः शून्यस्य वर्गो घनः।[11]
शून्यं मूलमपीह शून्यकमथो राशिः खहारो यदा
भिन्नाङ्कैः सहि∀तोऽथवा विरहितो गच्छेद्विकारं तदा॥ ४६॥[12] E6a

अत्रोद्देशकः॥ ४७.०॥[13]

चत्वारो वियता समेतरहिताः शून्येन संताडिताः
शून्याप्ताः कति शून्यतः कृतिघनौ मूलं च किं जायते।[14]
सार्धैः पञ्चभिरन्वितो वि∀रहितो राशिः खहारः कियां- J12a

---

[1] ह JU ] हा E. [2] मूल JE ] ∅ U; द्ध्य JU ] ध्य E; येत् JU ] योशा E. [3] ऽष्टलवे E(without *avagraha*) ] त्रिलवे J, तृले U. [4] अथ JU ] ∅ E; ज JE ] ∅ U. [5] अथभि···जातं JU(र्गादौ J ] र्गौ U('au' corrected to 'ā' and 'dau4' in margin, where '4' is the line number)) ] भिन्नवर्गादौन्यासेयथा E. [6] अस्य JU ] ∅ E. [7] जातो JU ] ∅ E; नः E ] न JU. [8] लब्धं JU ] घन E. [9] In his commentary on *Siddhāntaśekhara* 13.12, Babuāji Miśra cites this section except 46.0 and 49.1. Here I note the variant readings in it with the designation M. [10] र्माष्टके JU ] र्मणि E; वृत्तं JU ] ∅ E. [11] ऽप्य (1st) ] थ J, प्य U, त्य E, ह्य M; च्छू JU ] षू E, त् शू M; साव JEM ] सारव U. [12] रहि JEM ] रह U; तदा JUM ] तदाह E('ha' crossed out). [13] अत्रोद्देशकः JU ] उदा° E, उदाहरणं च M. [14] समेत JUE ] युता वि M; कृ EM ] क JU.

स्तन्मे ब्रूहि कलाकलापकुशले बाले विलोलेक्षणे॥ ४७॥[1]

न्यासः। ४॥ एते शून्येन युतोनिता जाता अविकृता एव ४।[2] पुनरेते ४ शून्येन गुणिताः
U6a शून्यमेव जाताः ०।[3] अथैते ४ ∀ शून्येन भक्ता जातोऽयमविकारः खहारराशिः [४/०] ॥ ४७.१॥[4]

[5]अथ वर्गार्थं न्यासः। ०॥[6] अस्य जातो वर्गः ०।[7] अतो लब्धं मूलम् ०। अथास्य जातो घनः ०।[8] अतो लब्धं मूलम् ०॥ ४७.२॥[9]

अथ विकारदर्शनार्थं खहरस्य न्यासः [४/०] अयं सार्धैः पञ्चभि [११/२] र्युतोनितः क्रियते।[10] समच्छेदरीत्या युक्तो जातः[11] [८/०] हीनो जातः [८/०] एवं खहरे राशौ विकारो दृश्यते॥ ४७.३॥[12]

J12b ‘अस्मिन्वि∀कारः खहरे न राशौ’[13] यद्भास्करीये गणिते प्रणीतम्।[14]
व्यक्तास्त्यनैकान्तिकता हि तस्य भिन्नाङ्कयोगे यदि वा वियोगे॥ ४८॥[15]
विष्णुपदाभ्यसनात्प्रतिपन्नोऽनन्तमयत्वमतोऽपि पुनस्तम्।[16]
प्रापयितुं विकृतिं हरसंज्ञो नैव कदापि भवेत्सुसमर्थः॥ ४९॥[17]

इति शून्यपरिकर्माष्टकम्॥ ४९.१॥

E6b इति श्रीमद्दैवज्ञढुण्ढिराजात्मजगणेशविरचितायां गणितमञ्जर्यां परिकर्माष्टका∀नि॥ ४९.२॥

⟨ ३ जातिगणः ⟩

विलोमविधौ करणसूत्रं वृत्तम्॥ ५०.०॥[18]

वर्गं मूलं पदमथ कृतिं चास्वकं स्वं स्वमस्वं
हारं तद्वद्गुणमपि गुणं हारमंशोऽधिकोने।[19]
अंशं स्वांशाधिकविरहितच्छेदमेवं विलोमे
J13a दृ∀श्येऽवश्यं गणितकुशलो राशिसिद्धौ विदध्यात्॥ ५०॥[20]

अत्रोद्देशकः॥ ५१.०॥

---

[1] हारः JUE ] भक्तः M. [2] ४ JUE ] ∅ M. [3] णिताः EM ] णिता JU. [4] हा JUE ] ह M; [४/०] JUE ] ∅ M. [5] Paragraph 47.2 in M reads: अथ शून्यस्य वर्गस्तन्मूलं च तथा घनो घनमूलं च शून्यमेव ०। [6] र्थं JE ] र्थ U. [7] जातो JU ] ∅ E. [8] नः JU ] नःशून्यमेव E. [9] तोलब्धं JU ] स्य E. [10] सा···भि JUM ] सार्धैःपं। चभिः E(‘|’ crossed out). [11] छे···क्तो JU ] छेदीकृत्ययुतो EM. [12] रे JUE ] र M; ते JEM ] त्ये U. [13] BG 6a. [14] री JUM ] रा E; णी JUM ] णा E. [15] यदि JUM ] यादि E. [16] भ्य UEM ] न्य J. [17] ज्ञो UEM ] ज्ञौ J. [18] वृत्तं JU ] ∅ E. [19] तिं UE ] तिः J; स्वम JU ] म E; शो JU ] शे E. [20] शंस्वां JU ] शस्त्वं E.

राशेर्यस्य कराहतस्य च पदं स्वाष्टांशयुग्वर्गितं
रामाप्तं च जिनैस्त्रिभिर्नवलवैरूनं मनूनं पुनः ।[1]
शिष्टं वेदमितं विलोमविधिना तं ब्रूहि राशिं सखे
चेत्पाटीगणिताटवी प्रकटितं शार्दूलविक्रीडितम् ॥ ५१ ॥

न्यासः । गुणः २ मूल ० ध १/९ व ० भा∀गः ३ रू ३/९ रू १४ दृश्यं ४ ॥[2] यथोक्तकरणेन U6b
राशिः ३२ ॥ ५१.१ ॥[3]

इष्टकर्मणि करणसूत्रं वृत्तम् ॥ ५२.० ॥

इष्टो राशिः पृच्छकालापवद्वै स्वीयैर्भागैर्वर्जितः संयुतो वा ।[4]
इष्टाभ्यस्तं दृश्यमेतेन भक्तं राशिः स ∀स्यादिष्टकर्मोक्तमेवम् ॥ ५२ ॥[5] J13b

विशेषजात्युदाहरणम् ॥ ५३.० ॥

लङ्कानाथं दलमभिययौ कुम्भकर्णं युगांशः
पञ्चांशोऽपि प्रबलबलभृच्छक्रशत्रुं रणार्थम् ।[6]
यातः शेषं शरकरमितं धूम्रनेत्रं प्रकोपा-
न्मामाचक्ष्वाखिलकपिमितिं वेत्सि जातिं विशेषम् ॥ ५३ ॥[7]

न्यासः

| | | |
|---|---|---|
| १ | १ | १ |
| २ | ४ | ५ |

दृश्यम् २५ ॥ अत्रेष्टराशिं प्रकल्प्य यथोक्तकरणेन जातो राशिः ५०० ॥ ५३.१ ॥

अन्यच्च ॥ ५४.० ॥

विद्यामण्डितपण्डिताय नृपती रत्नोच्चयं यं ददौ
तस्यार्धं सचिवश्चमूपतिरपि त्र्यंशं युगांशं ततः ।[8]
सभ्यो ∀लेखनकार्यकृद्रसलवं तत्सर्व∀रत्नोन्मिति- E7a, J14a
र्जाता रामजिनैर्मिता वद सखे भूपार्पितानां मितिम् ॥ ५४ ॥[9]

---

[1] र्गि UE ] र्णि J. [2] मूल ० J ] मू॥ ०॥ U, — E(*mātrā* line); व ०। U ] व· JE; भागः JU ] भा· E; रू |३/९| J ] रू ३ U(which separates the denominator '9' from the numerator '3' and puts it between 'śiḥ' and 'pṛ' of verse 52a), स्वज्ञ |३/९| E; रू १४ JU ] ज्ञ १४ E('rū' is presumably an error for 'ū' < ūna, and 'jña' for ' kṣa' < kṣaya). [3] णेन E ] णे JU; रा JU ] जातोरा E. U has a scribal note in the top left corner of fol. 6b:

| अंशाधिकरहितच्छेदमिति | | | | | | | |
|---|---|---|---|---|---|---|---|
| गु | मू | यु | व | भा | ही | ही | दृश्य ४ |
| २ | ० | १/९ | ० | ३ | ३/९ | १४ | राशि ३२ |
| भा | व | ह | मू | गु | यु | यु | विलोम |

विधेरुक्तवत्

[4] गै JE ] गैर्भागै U; र्व···तो JU ] स्संयुतोवर्जितो E. [5] स E ] सः JU. [6] त्रुं U ] न्नुं J, क्रुं E. [7] मितिं E ] मिति JU. E transposes words and letters of this verse as follows (the numerals indicate the correct order): [1]लङ्कानाथं [4]प्रकोपान्मामाचक्ष्वाखिलकपिमितिंवेत्सिजा [3]पंचांशोपिप्रवलवलभृच्छक्रशक्रुंरणार्थं॥ यातःशेषं-शरकरमितंधूम्रनेत्रं [2]दलमभिययौकुंभक्कर्णंयुगांशः [5]तिं विशेषां॥ [8] तः JE ] ततः U. [9] द्रस JU ] द्रत्य E; नां JE ] ना U.

न्यासः

| | | | |
|---|---|---|---|
| १ | १ | १ | १ |
| २ | ३ | ४ | ६ |

दृश्यम् २४३॥[1] अत्रापि पूर्ववज्जातो राशिः १०८॥ ५४.१॥[2]

अथ शेषजात्युदाहरणम्॥ ५५.०॥

आहर्तुं जलधेर्जलं बलिबलाद्रामाभिषेके दलं
शेषात्पञ्चलवत्रयं सुरनदीं रेवां युगांशो ययौ।[3]
त्र्यंशो वेत्रवतीं च शेषदशकं बाले कलिन्दात्मजां
सर्वे ते बलिनः कतीति वद मे चेच्छेषजातौ मतिः॥ ५५॥[4]

न्यासः

| | | | |
|---|---|---|---|
| १ | ३ | १ | १ |
| २ | ५ | ४ | ३ |

दृश्यम् १०॥[5] इदमुदाहरणमपवाहनविलोमविधीष्टकर्मभिः समायाति तत्तद्विषयत्वात्।[6] तद्यथा॥ ५५.१॥

J14b, U7a अपवाहने न्यासः ∀

| |
|---|
| १ |
| १ |
| १ |
| २ |
| ३ |
| ५ |
| १ |
| ४ |
| १ |
| ३ |

[7] ∀ 'हरघ्नेषु रूपेषु' (GM 37a) इत्यादिनापवाहनसूत्रेण जातम्[8]

| |
|---|
| १ |
| १० |

अनेनेष्टगुणितदृश्यं भक्तं सज्जातो राशिः १००॥ ५५.२॥[9]

अथ विलोमविधेरानयनार्थं भागानां न्यासः[10]

| | | | |
|---|---|---|---|
| १ | ३ | १ | १ |
| १ | २ | ३ | २ |

दृश्यम् १०॥ अतो 'वर्गं मूलं पदमथ कृतिं चास्वकम्' (GM 50a) इत्यादिना जातो राशिः स एव १००॥ ५५.३॥[11]

अथेष्टकर्मणा राशिसिद्ध्यर्थं भागानां न्यासो विधीयते[12]

| | | | |
|---|---|---|---|
| १ | ३ | १ | १ |
| २ | ५ | ४ | ३ |

[13] दृश्यम् १०॥[14] अत्रेष्टराशिं प्रकल्प्य पृथग्भिन्नगुणनरीत्या तदंशत्वं सम्पाद्य 'वर्जितः संयुतो वा' (GM 52b)
J15a इति कार्यम्।[15] तथाकृते जातम्[16]

| |
|---|
| १ |
| १० |

अनेनेष्टगुणितदृश्ये विभक्ते पुनर्जातो राशिः ∀स एव १००॥ ५५.४॥[17]

E7b अथवा ∀ विलोमविधिना भागाः[18]

| | | | |
|---|---|---|---|
| १ | ३ | १ | १ |
| १ | २ | ३ | २ |

दृश्यम् १०॥ अत्रापीष्टराशिं

---

[1] E includes in the table 'dṛ' of this 'dṛśyam' and 'va' of 'valād' (for 'balād') of the first quarter of the next verse (55a) as follows: ···न्यासः ···लंवलि

| | | | | |
|---|---|---|---|---|
| १ | १ | १ | १ | दृ |
| २ | ३ | ४ | ६ | व |

श्यं··· ला··· [2] पूर्वव JE ] पूर्वं U('ṃ' deleted). [3] भिषे JE ] भाषि U; लव UE ] लवः J; दीं JU ] दी E. [4] कलिंदा JE ] कलिंबा U. [5] श्यं E ] श्य JU. [6] इ···भिः JU ] इदमुदाहरणंभागापवाहेनविलोमविधिना इष्टकर्मणाच E. [7] ह···

| |
|---|
| १ |
| · |
| · |
| ३ |

JU(the column in margin) ] हे E. [8] पवाहन JU ] भागापवाह E; जातं JE ] जाते U. [9] णित JU ] ण E; भ JE ] भु U. [10] विअ···र्थं JU ] विलोमविधिना E; भागानां U ] भामानां J, ∅ E. [11] थकृतिं JE ] कृतिं U('tiṃ' changed to 'tīṃ'). [12] शि JE ] शिः U; भा···ते JU ] न्यासः E. [13] १/३ JE ] १/६ U. [14] श्यं E ] श्य J, श्यः U. [15] ष्ट JU ] ष्टं E; प्र JU ] ∅ E; संपा JE ] सपा U; तः E ] त JU; वा JE ] च U. [16] ते JE ] त U. [17] णित JU ] णे E; शिः JE ] शि U.

प्रकल्प्येष्टकर्मवत्तदंशत्वं सम्पाद्य ‘अस्वकं स्वम्’ (GM 50a) इत्युक्तत्वाद्भागान्संयोज्य जातम्[1]

| |
|---|
| १० |
| १ |

अनेनेष्टगुणितदृश्यभजने प्राप्ते ‘हारं तद्वद्गुणमथ गुणं हारम्’ (GM 50b)[2] इत्युक्तत्वाद्गुणन-प्राप्तिः। अतोऽनेनेष्टगुणितदृश्ये गुणिते स्वच्छेदेन विभाजिते पुनर्जातो राशिः स एव १००॥ ५५.५॥[3]

अथवान्यत्करणसूत्रं वृत्तम्॥ ५६.०॥[4]

उद्देशकालापवदेव यद्वा हाराभिघातेन निहत्य दृश्यम्।[5]
लवोनसंयुक्तहराभिहत्या विभाजयेल्लब्धमितोऽत्र राशिः॥ ५६॥

न्या∀सः

| | | | |
|---|---|---|---|
| १ | ३ | १ | १ |
| २ | ५ | ४ | ३ |

दृश्यम् १०॥ अत्र हराणामभिहतिर्जातो गुणकः १२०।[6] अथ J15b
लवोनितहराणामभिहतिर्जातो भाजकः १२। अथ गुणकभाजकौ द्वादशभिर∀पवर्तितौ जातौ U7b
गुणकः १० भाजकः १।[7] दृश्यं गुणकगुणितं भाजकेन विभाजितं सञ्जातो राशिः स एव १००।[8] इति शेषजातिः समाप्ता॥ ५६.१॥[9]

अथाशेषजात्युदाहरणम्॥ ५७.०॥

हंसान्हंसशरांशसम्मितबकाः प्राप्ताश्च कारण्डवा-
स्तद्योगाग्निलवोन्मिता अथ तदैक्यार्धोन्मिताः सारसाः।[10]
क्रौञ्चास्तन्मिलनाष्टभागमितयः सर्वेऽभ्रतारामिता
हंसान्ब्रूहि सखे हि वेत्सि वि∀मलां जातिं त्वशेषाभिधाम्॥ ५७॥[11] J16a

न्यासः

| | | | |
|---|---|---|---|
| १ | १ | १ | १ |
| ५ | ३ | २ | ८ |

∀दृश्यम् २७०॥ इदमुदाहरणं भागानुबन्धविलोमविधीष्टकर्मभिः E8a
समायाति तत्तद्विषयत्वात्॥ ५७.१॥

---

[18] ना E ] ∅ JU. [1] शिं JU ] शि E; र्मं JU ] रं E; न्सं JU ] न्स E. [2] GM 50b reads ‘api’ for ‘atha’. [3] स्व JE ] स्वे U; पुनर्जातोराशिःस JE ] मु। नहर्जादृश्यं॥ लवोन। स U(‘mu’ corrected to ‘pu’; 1st *daṇḍa*, ‘ha’, ‘dṛśyaṃ’, and ‘lavona’ crossed out; and ‘torāśiḥ’ in margin). [4] वृत्तं JU ] ∅ E. [5] पव JE ] पवा U; त्य JE ] न्य U. [6] रा JE ] र U; र्जा JE ] जा U. [7] अथ JU ] ∅ E; र्त्तितौ JE ] र्त्तित U; कः १० E ] क १० JU; कः १ E ] क १० J(‘10’ damaged)U. [8] दृ···णितं UE ] XXXXXणितं J; सज्जा E ] सजा JU. [9] शेष JE ] विषशे U(with ‘1’ and ‘2’ respectively above ‘śe’ and ‘ṣa’); तिः समाप्ता ] तिसमाप्ता JU, तिः E. [10] वा UE ] का J; गा E ] या JU. [11] ताहं E ] तान्हं JU; तिं JU ] निं E; भिधां JU ] भिघां E.

तत्र भागानुबन्धे न्यासः

| |
|---|
| १ |
| १ |
| १ |
| ५ |
| १ |
| ३ |
| १ |
| २ |
| १ |
| ८ |

[1] ‘हरघ्नेषु रूपेषु भागा धनर्णम्’ (GM 37a) इत्यादिनानुबन्ध-सूत्रेण जातम्[2]

| |
|---|
| २७ |
| १० |

अनेनेष्टगुणितदृश्ये विभक्ते जातो राशिः १००॥ ५७.२॥

अथ विलोमविधेरानयनार्थं भागानां न्यासः[3]

| | | | |
|---|---|---|---|
| १ | १ | १ | १ |
| ६ | ४ | ३ | ९ |

[4] दृश्यम् २७०॥[5] ‘वर्गं मूलं पदमथ कृतिम्’ (GM 50a) इत्यादिना पुनर्जातो राशिः स एव १००॥ ५७.३॥[6]

[7]अथवेष्टकर्मणा जातः

| |
|---|
| २७ |
| १० |

अनेनेष्टगुणितदृश्ये विभाजिते पुनर्जातो राशिः स एव १००॥ ५७.४॥

[8]अथवा ‘उद्देशकालापवद्’ (GM 56a) इत्यादिना हरहतिर्गुणकः २४०। लवयुक्तहर-हतिर्भाजकः ६४८। आभ्यां जातो राशिः १००॥ ५७.५॥

इत्यशेषजातिः॥ ५७.६॥

J16b अथ शेषांशमूलजातौ करणसू∀त्रवृत्तम्॥ ५८.०॥[9]

मूले हीनयुते तदीयकृतियुग्वेदघ्नदृश्यस्य य-
न्मूलं मूलसमन्वितोनितमथो तत्खण्डवर्गोन्मितम्।[10]
दृश्यं कल्प्यमतो विलोमविधिना भागे विहीनेऽधिके
कुर्यान्मूललवान्तमित्यतिमती राशिप्रसिद्धौ विधिम्॥ ५८॥[11]

अत्रोद्देशकः॥ ५९.०॥

U8a प्रादाद्राजा ∀क्रमेणावनिसुरनिकरेभ्यो ललाम्नां समूहा-
द्दुद्रांशं सप्तमूलान्यथ रसलवकं वेदमूलानि शेषात्।[12]
E8b शिष्टान्येवं च पञ्चामलमतिगणक ∀ब्रूहि मां तत्प्रमाणं

---

[1] U puts this column in margin with the symbol ‘=’ above each letter of ‘nyāsaḥ’. [2] गा E ] गादि JU; जातं JE ] जात U. [3] भागानां JU ] ∅ E. [4] १ ३ JE ] १ ६ U. [5] २७० JU ] ७० E. [6] र्गं E ] र्ग JU; लं JE ] ल U; व १००॥ UE ] वः॥ १००॥ J. [7] JU omit this paragraph. [8] JU omit this paragraph. [9] अ JU ] आ E(corrcted); त्र JU ] त्रं E. [10] घ्न JE ] घ्नि U(corrected). [11] In J, the vertical lines of ‘ta’ of ‘lavāṃta’ and of the vowel sign ‘i’ of the next letter ‘mi’ are combined with a short horizontal line. [12] प्रादा JE ] प्रा U; निकरेभ्यो JE ] निरकेरेभ्या U(‘nirake’ corrected to ‘nika’); द्दुद्रांशं JU ] द्राशं E; थ JU ] था E(corrected); लानि UE ] लाप्त J(corrected).

जातिः शेषांशमूला तव यदि विदिता पर्वतीभूतगर्व॥ ५९ ॥[1]

∀

न्यासः

| भा | मू | भा | मू |
|---|---|---|---|
| १ ११ | ७ | १ ६ | ४ |

दृश्यम् ५॥ अत्र पञ्चमितं दृश्यं चतुर्गुणं २० मूलकृत्या- J17a
नया १६ युक्तं जातम् ३६।[2] अस्य मूलम् ६। एतन्मूलेन युक्तम् १०।[3] अस्यार्धवर्गः २५॥ ५९.१॥

अथ विलोमतः षडंशः पञ्चांशो जातः[4] | १ ५ | अथेदं दृश्यं २५ स्वकीयपञ्चमांशयुक्तं जातं पुनर्द्वितीयं दृश्यम् ३०।[5] पुनरेतन्मितं दृश्यं परिकल्प्य 'मूले हीनयुते तदीयकृतियुग्वेदघ्नदृश्यस्य यन्मूलम्' (GM 58ab) इत्यादिना जातं पुनर्दृश्यम् १००।[6] अथ विलोमविधिनैकादशांशो जातो दशमांशः | १ १० | अथेदं दृश्यं स्वकीयदशमांशेन युक्तं जातं पुनर्दृश्यम् ∀११०।[7] अयमेव राशिः॥ J17b
५९.२॥

शेषभागपदजातिविधेर्यो राशिमानकथने सुसमर्थः।[8]
तन्मुखे[9]ऽद्भुतविलासविशेषैर्भारती विहरतीति वितर्के॥ ६०॥[10]

इति शेषांशमूलजातिः॥ ६०.१॥

अथ संक्रमणे करणसूत्रं वृत्तम्॥ ६१.०॥[11]

योगो वियोगोनयुतोऽर्धितस्तौ राशी भवेतामिति संक्रमाख्यम्।
वर्गान्तरं योगहृतं वियोगो राशी ततः पूर्ववदेव साध्यौ॥ ६१॥

अत्रोद्देशकः॥ ६२.०॥

यद्योगः शतकमितोऽन्तरं च विंशत्तौ राशी मम वद वेत्सि संक्रमं चे∀त्।[12] E9a
यद्योगो दश ननु वर्गयोर्वियोगो विंशत्तावपि सुमतिप्रहर्षिणीह॥ ६२॥[13]

न्यासः। यो∀गः १००। वियोगः २०॥[14] उक्तवज्जातौ राशी ४०। ६०॥ ६२.१॥[15] J18a
द्वीतीयोदाहरणे न्यासः। योगः १०। वर्गान्तरम् २०॥ उक्तवज्जातौ राशी ४। ६॥ ६२.२॥[16]

अथान्यत्सूत्रम्॥ ६३.०॥[17]

---

[1] तिः JE ] तिः। U; ला E ] लं JU; विदि JU ] विहि E; गर्व E ] वर्गः JU. [2] क्तं JU ] तं E. [3] युक्तं JU ] युतं E. [4] षडंशः JE ] ॥ षडंशः॥ U. [5] जा JU ] ज्म E; दृश्यं (2nd) JU ] दृश्य E. [6] घ्न JU ] घ्नु E. [7] कीय JE ] कीयं U; यु JE ] य U. [8] धे JE ] धि U. [9] U ends abruptly after the words 'tanmukhe' on fol. 8a, which has a blank space for one and a half lines at the bottom. [10] र्भारती ] र्भारति J, भारती E. [11] सू J ] पू E. [12] कमि J ] गणि E; मं E ] मणं J. [13] र्षि J ] र्ष E. [14] गः E ] ग J. [15] तौराशी E ] तो J. [16] जातौ ] जातो J, ∅ E; ४। ६। J ] ६। ४। E. [17] अथान्यत्सू J ] स्त E.

वेदघ्नराशिहतिवर्जितराशियोगवर्गस्य मूलमुदितं विवरं तदीयम्।
वेदघ्नघातसहितान्तरवर्गमूलं योगस्ततः कथितवद्भवतोऽत्र राशी॥ ६३॥[1]

अत्रोद्देशकः॥ ६४.०॥

ययोः सप्तमितो योगो द्वादशप्रमिताहतिः।
अन्तरं च द्वयं घातः पञ्चत्रिंशच्च तौ वद॥ ६४॥

न्यासः। योगः ७ घातः १२॥[2] अथ राशियोगवर्गः ४९।[3] चतुर्गुणराशिघातेन ४८ वर्जितः
J18b १। अस्य मूलं जातं राश्यन्तरम् १। अतः ∀पूर्ववज्जातौ राशी ३। ४॥ ६४.१॥

द्वितीयोदाहरणे न्यासः। अन्तरम् २। घातः ३५। अयं चतुर्गुणः १४०। अनेन युक्तोऽन्तरवर्गः १४४। अस्य मूलं जातो योगः १२।[4] अतो जातौ राशी ५। ७॥ ६४.२॥[5]

अथान्यत्सूत्रम्॥ ६५.०॥

राश्यैक्यवर्गपरिहीनयमघ्नराशिवर्गाभिसंयुतिपदं विवरं तयोः स्यात्।[6]
नेत्रघ्नवर्गयुतिरन्तरवर्गहीना तन्मूलमैक्यमथ पूर्ववदेव राशी॥ ६५॥[7]

अत्रोद्देशकः॥ ६६.०॥

यद्योगो विषयाश्विभिः परिमितो यद्वर्गयोः संयुति-
स्तत्त्वाग्निप्रमिता यदन्तरमथो बाणेन्दुभिः सम्मितम्।[8]
J19a यद्वर्गैक्यमिषुद्विकाब्धि∀गणितं तौ ब्रूहि राशी हि मे
E9b चेत्पाटीगहनावगाहनमनाः पञ्चाननस्त्वं ∀सखे॥ ६६॥

न्यासः। योगः २५। वर्गयोगः ३२५॥ अयं द्विगुणः ६५०। राशियोगवर्गेण हीनः २५।[9] अस्य मूलं जातं राश्यन्तरम् ५।[10] अतो जातौ राशी १०। १५॥ ६६.१॥

द्वितीयोदाहराणे न्यासः। अन्तरम् १५। वर्गयोगः ४२५॥ अयं द्विगुणः ८५०। अन्तरवर्गेणानेन २२५ हीनः ६२५।[11] अस्य मूलं जातो राशियोगः २५। अतो जातौ राशी २०। ५॥ ६६.२॥[12]

'वर्गान्तरं राशिवियोगभक्तं योगस्ततः प्रोक्तवदेव राशी'।[13]
J19b यद्भास्करीये गणिते प्रणीतं तत्तुल्यराश्योः प्रविचारमे∀ति॥ ६७॥[14]

---

[1] हितांत J ] हितीत E; वतोत्र J ] तोवत्र E(with '1' and '2' respectively above 'va' and 'to'). [2] तः E ] त J. [3] अथ J ] ∅ E. [4] यो J ] वर्गयो E. [5] ५। ७ J ] ७। ५ E. [6] राशि J ] रशि E; भिसं J ] मिशं E. [7] नात E ] नात्त J. [8] यदंत J ] यंदंत E. [9] यो···ण E ] वर्गेणयोग J. [10] जातं J ] ∅ E. [11] नः E ] न J. [12] तौराशी ] तौराशि J, तोराशी E. [13] L 58. [14] द्भा J ] द्भ E.

इति संक्रमणम्॥ ६७.१॥[1]

वर्गकर्मणि करणसूत्रं वृत्तत्रयम्॥ ६८.०॥[2]

अभीष्टराशिः प्रथमः प्रकल्प्यस्तद्वर्गखण्डं च भवेद्द्वितीयः।
राश्योस्तयोर्वर्गवियोगयोगौ रूपेण युक्तौ पददौ भवेताम्॥ ६८॥[3]
इष्टस्य वर्गो द्विगुणः सरूपो द्विघ्नेष्टभक्तः प्रथमो द्वितीयः।[4]
रूपं तयोर्वर्गवियोगयोगौ रूपेण हीनौ पददौ भवेताम्॥ ६९॥[5]
इष्टघनः प्रथमोऽसाविष्टदलघ्नः सरूपकस्त्वपरः।
तत्कृतियोगवियोगौ व्येकौ मूलप्रदौ स्याताम्॥ ७०॥

अत्रोद्देशकः॥ ७१.०॥

राश्योर्ययोर्वर्गवियोगयोगौ रूपेण युक्तौ यदि वा विहीनौ।
मूलप्रदौ तौ वद यत्र बीजे सखे सखेदाः सुधियो भवन्ति॥ ७१॥

अत्र प्रथमानयने कल्पित इष्टः प्रथमो राशिः २।[6] अस्य व∀र्गार्धं जातोऽपरः २। अथवेष्टः J20a
प्रथमो राशिः ३। अस्य वर्गार्धं जातो द्वितीयः[7] (९/२) एव∀मेतौ रूपयुतौ॥ ७१.१॥ E10a

अथ रूपशुद्धौ राशी प्रतिपाद्येते।[8] अत्र कल्पित इष्टः १।[9] अस्य वर्गो द्विगुणितः सरूपश्च ३।[10] द्विघ्नेष्टभक्तो जातः प्रथमो राशिः (३/२) द्वितीयो रूपम्।[11] एवमेतौ राशी (३/२ | १/१)[12] अथवा कल्पित इष्टः २।[13] अतः पूर्ववज्जातौ राशी[14] (९/४ | १/१) अथवा कल्पित इष्टः १। अस्य घनो जातः प्रथमो राशिः १।[15] असाविष्टार्धगुणितः सरूपश्च जातो द्वितीयः (३/२) एवमेतौ
राशी (१/१ | ३/२) अ∀थवेष्टः २। अस्य घनो जातः प्रथमः ८। असाविष्टार्धहतः सरूपो जातो J20b
द्वितीयः ९।[16] एवमिष्टवशादनेकधा॥ ७१.२॥

इति वर्गकर्म॥ ७१.३॥

---

[1] मणं J ] मेणं E. [2] व J ] अथव E; त्रयं E ] द्वयं J. Here, the original word 'trayaṃ' preserved in E has been changed to 'dvayaṃ' in J, presumably in accordance with the corrupt text of an intermediate step: (1) 'vṛttatrayaṃ' with three verses (preserved in E) → haplological omission of 68d-69c → (2) 'vṛttatrayaṃ' with two verses (intermediate step) → emendation of 68.0 → (3) 'vṛttadvayaṃ' with two verses (preserved in J). [3] रू···वेतां E ] ∅ J(here begins a haplological omission caused by 'rūpeṇa'). [4] इ···यः E ] ∅ J. [5] रूपं···गौ ] ∅ J(here ends the omission), रूपंतयोर्वर्गवियो‸गौ E(with 'gayo 4' in margin, where '4' is the line number). [6] ष्टः J ] ष्टः २ E; शिः E ] शीः J. [7] र्धं E ] र्ध J; द्वितीयः J ] परोराशिः E. [8] राशी J ] ∅ E; द्ये E ] द्य J. [9] अत्र J ] तत्र E. [10] स··· ३ J ] ∅ E(this omission continues up to the next 'athavā kalpita'). [11] द्वि···पं J ] ∅ E. [12] ए··· (३/२ | १/१) J ] ∅ E. [13] अ···त J ] ∅ E(this omission begins at 'sarūpaśca 3' above). [14] जातौ J ] ∅ E. [15] तः ··· १ J ] तोराशिः १ प्रथमः E. [16] तःसरूपो J ] तोरूपयुतो E.

वर्गप्रकृतौ करणसूत्रं वृत्तद्वयम्॥ ७२.०॥[1]

इष्टघ्नमूलोनसमेतराशेर्वेदघ्नदृश्यं गुणवर्गयुक्तम्।[2]
कृत्वास्य मूलं गुणकाढ्यहीनं तदर्धवर्गो भवतीह राशिः॥ ७२॥[3]
अथो लवैर्वर्जितयुक्तराशेर्भागोनसंयोजितरूपकेण।
दृश्यं तथा मूलगुणं विभज्य राशिस्ततः प्रोक्तवदेव साध्यः॥ ७३॥[4]

अत्रोद्देशकः॥ ७४.०॥

J21a लीलाखेले लालसानां जलान्ते मुक्ता मुक्तामालि∀का बालिकायाः।[5]
तस्याः पेतुर्नन्दमूलानि दृष्टा दिङ्मुक्तास्त्वं ब्रूहि मुक्ताप्रमाणम्॥ ७४॥[6]

न्यासः।[7] मू. गु. ९। दृश्यम् १०॥[8] वेदघ्नदृश्यं गुणवर्गयुक्तम् १२१।[9] अस्य मूलम् ११। गुणकयुक्तम् २०।[10] अस्यार्धवर्गो जातो राशिः १००॥ ७४.१॥[11]

मूलयुतावुद्देशकः॥ ७५.०॥

आत्ममूलदशकद्वययुक्ता नीरतीरविलसत्कलहंसाः।[12]
E10b तत्त्वयुक्तशतपञ्चकतुल्याश्चेत्सखे वद मितिं हि तदी∀याम्॥ ७५॥

न्यासः। मू. गु. २०।[13] दृश्यम् ५२५॥ वेदघ्नदृश्यम् २१००। गुणवर्गयुक्तम् २५००। अस्य
J21b मूलम् ५०। गुणकोनम् ३०। ∀एतस्यार्धवर्गो जातो रशिः २२५॥ ७५.१॥

उदाहरणम्॥ ७६.०॥

भृङ्गाणां कुलतो हि मूलदशकं यातं सुमल्लीं प्रति-
प्राप्तस्तुर्यलवश्च चम्पकतरुं राजीवराजिं ययुः।
भृङ्गाः सप्त करीन्द्रचारुगमने वर्गप्रकृत्यां मति
स्ते याता यदि विस्तृतिं वद मितिं पुष्पंधयानां द्रुतम्॥ ७६॥[14]

न्यासः। मू. गु. १०। भा. १/४ दृ. ७॥[15] 'अथो लवैर्वर्जितयुक्तराशेर्' (GM 73a) इत्यादिना भागोनेनैकेन ३/४[16] मूलगुणं दृश्यं च विभज्य जातं मू. गु. ४०/३ दृश्यम् २८/३ आभ्यां मूलगुणकदृश्याभ्यां 'इष्टघ्नमूलोनसमेतराशेर्' (GM 72a) इत्यादिना राशिः साध्यः।[17]
J22a ∀ यथा। दृश्यमेतत् २८/३ चतुर्गुणम् ११२/३ इदं गुणवर्गेणानेन १६००/९ 'परस्परं हारहतौ

---

[1] व J ] अथव E. [2] घ्नमू J ] घ्नःमू E; ण J ] न E. [3] ती J ] ता E. [4] प्रोक्त J ] पूर्व E. [5] लेलाल J ] लाला E; मुक्ता (1st) J ] ∅ E. [6] दिङ्मुक्ता J ] ग्मुक्ता E. [7] न्यासः J ] न्या. E. [8] दृश्यं J ] दृ. E. [9] श्यं J ] श्यं ४० E; र्ग J ] र्गेण ८१ E. [10] णक J ] ण ९ E. [11] स्या J ] स्य E; जा··· १००॥ J ] १००॥ जातोमुक्तासमूहः॥ E(double *daṇḍa* after '100' deleted). [12] क्तानीरती J ] क्तनीर॥ ता E. [13] मू. गु. J ] मूलगुद्या E. [14] नां J ] ना E. [15] दृ. J ] दृश्यं E. [16] ३/४ J ] ∅ E. [17] क J ] ∅ E; समेत J ] युतस्य E.

हरांशौ' (GM 33a) इत्यादिना युक्तं जातम्[1] [५८०८ / २७] अस्य मूलं न लभ्यतेऽतोऽत्र सम्प्रदायः।[2] एवंविधोदाहरणेषु यथा मूलं लभ्यते तथैवापवर्तनं कार्यम्।[3] अतश्चतुर्गुणं दृश्यं गुणवर्गयुक्तं तत्त्रिभिरपवर्तितम् [१९३६ / ९] अस्य मूलम् [४४ / ३] 'यद्वापवर्तं हरयोर्विधाय' (GM 33c) इत्यादिना लब्धं मूलं तदेव[4] [४४ / ३] इदं गुणकयुक्तं सञ्जातं [८४ / ३] स्वच्छेदेन भक्तं जातम् २८। अस्यार्धवर्गो जातो राशिः १९६॥ ७६.१॥

∀अन्यदुदाहरणम्॥ ७७.०॥ J22b

वै∀रिव्रातसमर्पितं गजकुलं तन्मूलविंशन्मिता- E11a
ज्ञात्यश्वांश्च नवांशसम्मितरथान्दृष्ट्वा प्रहृष्टोऽभवत्।[5]
कश्चिद्भूमिपतिश्चतुःशतमिता जाता युतिश्चेत्तदा
ते नागास्तुरगा रथाः कति पृथक् त्वं ब्रूहि मित्राशु माम्॥ ७७॥[6]

न्यासः। मू. गु. २०। भागः [१ / ९] दृश्यम् ४००॥[7] 'अथो लवैर्' (GM 73a) इत्यादिनात्रैकेन भागाढ्येन दृश्यं मूलगुणं च भक्तं जातं मू. गु. [१८ / १] दृश्यम् [३६० / १][8] अतः पूर्ववच्चतुर्गुणदृश्यम् [१४४०] गुणवर्गेणानेन [३२४ / १] युक्तं जातम् [१७६४ / १][9] अस्य मूलम् [४२ / १][10] एतद्गु∀णकोनं J23a
जातम् २४।[11] एतदर्धवर्गो जातो राशिः १४४। एतत्प्रमिता गजाः १४४।[12] अथास्य मूलविंशत् २४०।[13] एतन्मिता अश्वाः। अथ तस्यैव राशेर्नवांशः १६।[14] एतत्तुल्या रथाः।[15] एवं ज्ञेयम्॥ ७७.१॥

करणसूत्रं वृत्तम्॥ ७८.०॥

राशेरिष्टलवस्य मूलगुणको राशेस्तु भागास्तदा
तेनांशेन निहत्य मूलगुणकं दृश्यं तथातः परम्।
साध्यो राशिरुदीरितेन विधिना सोऽभीष्टसंभाजितः
प्राग्राशिप्रमितोऽयमिष्टगुणितो राशिर्भवेत्कल्पितः॥ ७८॥[16]

अत्रोद्देशकः॥ ७९.०॥

संग्रामे विमुखीकृतो दशमुखो रा∀मेण सल्लाघवा- J23b

---

[1] हतौ J ] युतौ E; क्तं J ] तं E. [2] ल···त्र J ] लभ्यतेऽत्रहास्युतौहरांशौ इत्या E('hā' etc. crossed out).
[3] वा J ] षां E. [4] यद्वा J ] यद्वा॥ यद्वा E. [5] हृ E ] हृ J. [6] ते E ] त्ते J. [7] भा···श्यं J ] भा १ एश्यं E.
[8] भक्तं J ] विभज्य E; [३६० / १] J ] ३६० E. [9] र्गुण J ] र्गुणं E; [३२४ / १] J ] ३२४ E; [१७६४ / १] J ] १७६४ E.
[10] [४२ / १] J ] ४२ E. [11] जातं J ] ∅ E. [12] १४४ J ] ∅ E. [13] अ···त् J ] अस्यमूलंविंशातिगुणं E.
[14] वांशः J ] वमांश E. [15] ल्या E ] ल्य J; रथाः। एवं ] रथा एवं JE. [16] दी J ] दा E; जितः E ] जिताः J.

द्बाणव्यूहशरांशमूलदशकं निष्कास्य तूणीमुखात् ।[1]
शार्दूलप्रमिताः शिलीमुखचयाब्ध्यंशेन संघातिताः
शेषं षष्ट्यधिकं शतं वद सखे ते रामबाणाः कति॥ ७९ ॥[2]

E11b न्यासः। मू. गु. १०। भागः $\frac{१}{४}$ दृश्यम् १६०॥[3] अत्र राशेः ∀ पञ्चमांशमूलानि गृहीतानि।[4] अतः पञ्चमांशेन मूलगुणकदृश्ये विगुण्य पुनर्न्यासः।[5] मू. गु. २। भा. $\frac{१}{४}$ दृ. ३२॥[6] ‘अथो लवैर्वर्जितयुक्तराशेर्’ (GM 73a) इत्यादिना भागोनितरूपम्[7] $\frac{३}{४}$ अनेन भक्ते
J24a मूलगुणकदृश्ये जाते स्पष्टे मू. गु. $\frac{८}{३}$ दृ∀श्यम् $\frac{१२८}{३}$[8] ‘अत इष्टघ्नमूलोनसमेतराशेर्’ (GM 72a) इत्यादिना वेदघ्नदृश्यम् $\frac{५१२}{३}$ इदं मूलगुणवर्गेणानेन $\frac{६४}{९}$ युक्तं जातम् $\frac{४८००}{२७}$[9] अत्रापवर्तनं कृत्वा मूलं ग्राह्यमित्यत्रापवर्ताङ्को वेदघ्नदृश्यस्य यन्मितश्छेदस्तन्मित एव।[10] वेदघ्नदृश्यस्य त्रिमितो हारोऽतस्त्रिभिरेवापवर्तनं कृत्वा लब्धम् $\frac{१६००}{९}$[11] अस्य मूलम् $\frac{४०}{३}$ ‘यद्वापवर्तं हरयोर्विधाय’ (GM 33c) इत्यादिना लब्धं मूलं तदेव[12] $\frac{४०}{३}$ इदं मूलगुणक $\frac{८}{३}$ युक्तं $\frac{४८}{३}$ स्वच्छेदेन भक्तं जातम् १६ ।[13] अस्यार्धवर्गो जातो राशिः पूर्वकल्पितराशिपञ्चमांश-
J24b तुल्यः ६४ । अयं पञ्चगुणो ∀जातः कल्पितो राशिः ३२०॥ ७९.१॥

उदाहरणम्॥ ८०.०॥

श्रीमन्मङ्गलमूर्तिगण्डयुगलस्फारद्विरेफव्रजं
स्वत्र्यंशस्य पदानि पूर्णशशिभिस्तुल्यानि रोलम्बकाः।[14]
प्राप्ताः कल्पतरोः शरांशकमिता मन्दारभूमीरुहा-
त्सर्वे संकलिताः खवेदशशिनो मौलालिमानं वद॥ ८०॥

न्यासः। मू. गु. १०। भा. $\frac{१}{५}$ दृश्यम् १४०॥ अत्रापि राशेस्तृतीयांशस्य पदानि गृहीतानि।
E12a अतस्तृतीयां∀शेन मूलगुणकदृश्ये निहत्य पुनर्न्यासः मू. गु. $\frac{१०}{३}$ भा. $\frac{१}{५}$ दृश्यम् $\frac{१४०}{३}$[15] ‘अथो लवैर्’ (GM 73a) इत्यादिना भागाढ्यरूपम् $\frac{६}{५}$[16] अनेन भक्ते मूलगुणकदृश्ये जाते

---

[1] विमु J ] विऽमु E; निष्कास्य J ] निःकाश्य E. [2] तिताः E ] तिताः ११ J; कति E ] कतिः J. [3] भागः J ] भा E. [4] श J ] शस्य E; तानि॥ J ] तानिः E. [5] न्र्या J ] न्या E. [6] दृ J ] दृश्यं E. [7] र्व···क्त J ] र्वार्जितयुक्ता E. [8] गुण J ] ∅ E. [9] मूल J ] ∅ E. [10] वर्त्तांको J ] वर्त्तनांको E; दस्त J ] दःस्त E. [11] लब्धं J ] लब्धे E; १६०० J ] १६०९ E. [12] यद्वा J ] यद्वा॥ यद्वा E; विधाय J ] ∅ E; मूलं J ] ∅ E. [13] मू··· युक्तं ] मूल $\frac{८}{३}$ गुणकयुक्तं J, गुणकयुतं E. [14] मंगल E ] मूंगल J. [15] मूल··· $\frac{१४०}{३}$ E ] ∅ J(here begins a haplological omission caused by ‘mūlaguṇakadṛśye’). [16] अ··· $\frac{६}{५}$ E ] ∅ J.

स्पष्टे मू.न् गु. २५/९ दृ. ३५०/९ [1] आभ्यां जातो राशिः पूर्वकल्पितराशेस्तृतीयांशः २५ । अयं
त्रिगुणो जातः कल्पितराशिः ∀७५ ॥ ८०.१ ।[2] J25a

करणसूत्रं वृत्तम् ॥ ८१.० ॥

राशेरिष्टलवस्य मूलगुणको भागश्च राश्युद्भवं
दृश्यं स्यात्तु तदा तदंशनिहता मूलांशदृश्या अपि ।[3]
तेभ्यो राशिरुदीरितेन विधिना साध्यः स इष्टांशकः
प्राग्राशिः कथितोऽयमिष्टगुणितो राशिर्भवेत्कल्पितः ॥ ८१ ॥[4]

अत्रोद्देशकः ॥ ८२.० ॥

श्रीकृष्णे जलकेलये प्रचलिते गोपालमेलाङ्कितः
कालिन्दीं जलचालनाय चलिता दिङ्मूलसंख्याः सखे ।[5]
अष्टौ पञ्चलवाः कदम्बकतरुं तीरे दशावस्थिता-
स्तन्मानं वद कोविदोऽसि गणिते वर्गप्रकृत्याह्वये ॥ ८२ ॥[6]

न्यासः । मू. गु. १० ।[7] भा. ८/५ दृ. १० ॥[8] अ∀त्र राशेश्चतुर्थांशस्य मूलानि भागाश्च J25b
गृहीताः ।[9] अतश्चतुर्थांशेनैव मूलगुणकभागदृश्यान्यपि सवर्णितानि जातानि स्पष्टानि मू. गु.
५/२ भाग २/५ दृश्यम् ५/२ [10] ‘अथो लवैर्’ (GM 73a) इत्यादिना भागोनरूपम् ३/५ अनेन
मूलगुणकदृश्ये भक्ते जाते स्पष्टे मू. गु. २५/६ दृश्यम् २५/६ [11] अत ‘इष्टघ्नमूलोनसमेतराशेर्’
(GM 72a) इत्यादिना चतुर्गुणं दृश्यम् १००/६ [12] अस्य गुणवर्गयुक्तस्य मूलम् ३५/६ ∀ इदं E12b
गुणकाढ्यम् ६०/६ स्वच्छेदेन भक्तं लब्धम् १० । अस्यार्धवर्गः पूर्वराशिचतुर्थांशतुल्यः २५ । अयं
चतुर्गुणो जातः पूर्वरा∀शिः १०० ॥ ८२.१ ॥ J26a

अत्रोद्देशकः ॥ ८३.० ॥

पुष्पैः केनचिदर्चितो गणपतिस्तत्पञ्चमांशस्य चे-
न्मूलैर्द्वादशभिः परेण नवभिस्तुर्यांशकैस्तत्परः ।[13]

---

[1] अ· · ·क्ते E ] ∅ J(here ends the omission); ल E ] लगुण J; दृ J ] दृश्यं E. [2] शिः J ] शि E. [3] ग J ] गा E; राश्यु J ] रोश्यु E(corrected); मूलांशदृश्या ] मूलांशतुल्या J, मूलंशदृश्या E. [4] रा· · ·तो J ] ∅ E(a haplological omission caused by ‘rāśir’); शिः ] सः J. Cf. GM 78d. [5] लिंदीं J ] लिंदी E. [6] तरुं J ] लरुं E; ह्व J ] ह्व E. [7] मू. गु. J ] मुगु E. [8] दृ J ] दृश्यं E. [9] ताः E ] ता J. [10] क E ] कं J; भाग (2nd) J ] भा E; दृश्यं J ] दृ E. [11] मू. गु. ] मू J, मू. गुणः E; ‘2’ of 2nd ‘25’ is illegible in E. [12] लो E ] ले J. [13] तिस्त J ] तित E; दश J ] द E.

भक्त्यानर्च्य च रामरामदहनाः सर्वैक्यमासीत्सखे
पूर्वं यानि समर्पितानि कति तान्याचक्ष्व दक्षोऽसि चेत्॥ ८३॥[1]

न्यासः। मू. गु. १२। भाग १/४ दृश्यम् ३३३॥ अत्र राशेः पञ्चमांशस्य मूलानि गृहीतानि।[2] अतो मूलांशदृश्याः पञ्चमांशेन सवर्णिताः मू. गु. १२/५ भा. १/२० दृश्यम्[3] ३३३/५ 'अथो लवैर्' (GM 73a) इत्यादिना भागयुक्तरूपम्[4] २१/२० अनेन मूलगुणकदृश्ये भक्ते पञ्चभिरपवर्तिते
J26b जाते साधना∀र्हे मू. गु. ४८/२१ दृश्यम् १३३२/२१ [5] वेदघ्नदृश्यम् ५३२८/२१ पूर्ववद्गुणवर्गयुक्तस्यास्य मूलम्[6] ३९६/२१ इदं गुणकोनम् ३४८/२१ स्वच्छेदाप्तम् १२। अस्यार्धवर्गो जातो राशिपञ्चमांशः ३६। अयं पञ्चगुणो जातो राशिः १८०॥ ८३.१॥

करणसूत्रं वृत्तम्॥ ८४.०॥

मूलानि भागा बहवो भवेयुस्तदा तदैक्यं तु विधाय नूनम्।
राशिः प्रसाध्यो विधिनोदितेन चेद्भागभागा हि तदा प्रभागात्॥ ८४॥[7]

अत्रोद्देशकः॥ ८५.०॥

अश्वानां निकरात्परान्नरपतीन्क्षोणीश्वरः प्रीतये
E13a मूलान्यष्ट विसृष्टवान्शरलवं नन्दांश∀कं चाप्यथ।[8]
J27a पञ्चांशस्य ∀गुणांशकं कृतिमितान्शेषांश्च मित्र द्रुतं
जात्यश्वान्सकलान्वदामलमतिः पात्यां प्रविष्टास्ति चेत्॥ ८५॥[9]

अत्र पञ्चमांशगुणांशक इत्यत्र 'चेद्भागभागा हि तदा प्रभागात्' (GM 84d) इत्युक्तत्वात् 'लवा लवाभिगुणिताः' (GM 35a) इत्यादिना प्रभागाः कार्याः।[10] तथा कृते पञ्चदशांशो भवति। न्यासः।[11] मू. गु. ८। भा. १/५ भाग १/९ भागः १/१५ दृश्यम् २०॥[12] अत्र भागा बहवः सन्ति। अतः 'परस्परं हारहतौ हरांशौ' (GM 33a) इत्यादिना योगः कृतः पञ्चदशापवर्तितः
J27b १७/४५ [13] अयमेवैको भागः कल्प्यः। तथा न्यासः। ∀मू. गु. ८।[14] भागः[15] १७/४५ दृश्यम् २०। 'अथो लवैर्वर्जितयुक्तराशेर्' (GM 73c) इत्यादिना भागोनरूपम्[16] २८/४५ अनेन भक्ते

---

[1] र्च्य J ] र्च E; यानि ] येन JE. [2] ही E ] हि J. [3] श्यं E ] श्य J. [4] क्त J ] त E. [5] १३३२ J ] १३२ E. [6] वर्ग J ] क E. [7] ध्यो E ] ध्या J; गात् E ] गान् J. [8] नंदांश J ] नंदाश E. [9] J has 'nakha' above 'kṛti' (both stand for 20); षां E ] षा J. [10] भिगु E ] भिर्गु J. [11] न्या J ] एवंन्या E. [12] भाग J ] भा E; भागः J ] भा E; दृश्यं J ] दृ E. [13] र्त्तितः J ] र्त्तितश्च E. [14] गु. J ] ∅ E. [15] भागः J ] भा E. [16] अथो J ] अतोऽथो E.